**आत्माश्रमगुरुकुलम्**

संस्कृतविद्यालयः

**प्रार्थना**

ज्ञानान्दमयं देवं निर्मलस्फटिकाकृतिं आधारं सर्वविद्यानां हयग्रीवमुपास्महे ।।

महाव्याकरणाम्बोधिमन्थमानसमन्दरं कवयन्तं रामकीर्त्या हनुमन्तमुपास्महे ।।

नमोस्तु तात्विका देवा विष्णुभक्तिपरायणाः धर्ममार्गे प्रेरयन्तु भवन्तः सर्व एव हि ।।

शरीरचेष्टा मम ते प्रणामः स्तुतिस्तु वागिन्द्रियवृत्तिरस्तु ।

सर्वा मनोवृत्तिरनुस्मृतिस्स्यात् सर्वं तवाराधनमेव भूयात् ।

गुरोः सुसङ्गोस्तु दया च सेवा जन्मान्तरे तस्य गृहे जनिश्च ।।

श्रीमध्वशास्त्रश्रवणं मम स्यात् अनन्तकालेन सुपुण्यहेतोः ।।

दारेषु पुत्रेषु सुहृत्सुमित्रजनेषु शिष्येषु गुरौ प्रियेषु ।

प्रीतिर्मम स्यात् सततं गरीयसी प्रियेतरे प्रीतिविपर्ययः स्यात् ।

कोपो गुरूणां मयि नैव भूयात् दया गुरूणां मम सर्वदा स्यात् ।

निर्मायसेवा सततं मयि स्यात् निरूपमा पूर्णदया मयि स्यात् ।।

पिता च माता च सुहृत्सुबन्धुर्भ्राता सखा मे परदेवता च ।

भक्तिं प्रदेहि भगवन् त्वयि निश्चलां मे नित्यं त्वदीयपदपद्मनिषेवणं च ।।

आत्माश्रमः